# भूमिका

**ज्योतिश्चक्रे तु लोकस्य सर्वस्योक्तं शुभाशुभम् ।**

**ज्योतिर्ज्ञानं तु यो वेद स याति परमां गतिम् ।।**

**वेदचक्षुः किलेदं स्मृतं ज्यौतिषं मुख्यता चाङ्गमध्येऽस्य तेनोच्यते ।**

**संयुतोऽपीतरैः कर्णनासादिभिश्चक्षुषाङ्गेन हीनो न किञ्चित् करः ।।**

संस्कृतवाङ्मयं हि विश्ववाङ्मयसमुदाये मूर्द्धन्यमिति न सम्भवति कस्याऽपि विमतिः। अस्य हि विस्तृतं सुसमृद्धश्च सर्वाङ्गपूर्णकलेवरं सर्वानपि विस्मापयतीति नैवात्युक्तिः । अत्रत्यो हि शास्त्रत्वं सार्वभौमत्वञ्च ज्ञाननिधिरण-कालादारभ्य साम्प्रतिकयुगपर्यन्तमपि अनवरतरूपेणोपचीयमानो दृश्यते । वाङ्मयमिदमेवादाय - 'यन्नेहाऽस्ति न चान्यत्र यदिहास्ति न तत्क्वचित्' इत्युक्तिश्चरितार्था: दृश्यते । 'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः' इत्यादि-कर्मप्रवृत्त्युपदेशपरमन्त्राश्च यद्येकत्र सन्त्यत्र तथैवापरत्र 'अविद्या मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते' इति – प्रवृतिनिवृत्त्युपदेशपरवचनान्यपि लक्ष्यन्तेऽत्रैव । अनेन सिध्यति यदस्य वाङ्मयस्य मूलतो द्वौ भागौ - अविद्या विद्या चेति । अविद्याऽपरेत्युच्यते विज्ञानशब्देनाऽपि ज्ञायते,एवञ्च विद्या पराशब्देन ज्ञानशब्देनाऽपि ज्ञायते । पुरुषार्थसिद्धिरेवाऽस्य वाङ्मयस्य चरमं लक्ष्यम् । पुरुषार्थश्च चतुर्विधो धर्मार्थकाममोक्षभेदेन वर्तते । तत्र धर्मो हि बुद्धेर्विषयः, सदसद्विवेकलक्षणः अर्थश्च शरीरविषयो व्यवहारलक्षणः। कामो हि मनसो विषयो भोगलक्षणः । मोक्षस्तु आत्मनो विषयः चरमनिवृत्तिलक्षणः । एषां हि यथायोग्यप्रवृत्तिनिवृत्त्युपदेशप्रतिपादनवैलक्षण्यमेवाऽस्य वैशिष्ट्यम् । उक्तमेव –

**'धर्मार्थकामाः सममेव सेव्या यो ह्येकभक्तः स नरो जघन्य'** इति । धर्मानुरोधेनार्थ-स्यार्थस्यानुरोधेन कामस्य मोक्षानुरोधेन सर्वेषामुपयोग एवास्य परमः सन्देशः । तेन जनस्य मोक्ष एव चरमो लक्ष्यः । किन्तु स तु तुरीयः पादः । पादत्रयमतिक्रम्यैव तत्र गन्तुं शक्यते । धर्मा अनुष्ठेया:, अर्थाश्चोपार्जनीयाः, कामाश्च सेव्यास्तत एव मोक्षे रतिः सम्भवतीति तदनुरोधेन मानवजीवनमपि ब्रह्मचर्यगार्हस्थ्यवानप्रस्थसंन्यासावस्थाभेदेन चतुर्धैव विभक्तमस्ति । आपञ्चविंशतेर्ब्रह्मचारी भवति प्रवृत्तिनिवृत्तिज्ञानादिकमुपार्जयति । स्नातकश्च स गृहस्थाश्रमं प्रविशति विविधैर्भोगैरिन्द्रियाणि सन्तर्पयति यथायोगमापञ्च-पञ्चाशत्तमात् । तृप्तेन्द्रियश्च स वानप्रस्थं प्रविशति चरति च विविधं तपो विषयान्मनोनिवर्तनाय । विषयव्यावृत्तात्मा स संन्यासमधिगच्छति त्यक्तसर्वप-रिग्रहो यावज्जीवं त्यक्तकलेवरश्च परमेशानमाप्नोतीति सुव्यवस्थापिता जीवनचर्याऽत्र । न केवलमत्र पुरुषार्थसिद्धिरेव वर्णिताऽपितु तत्तन्मार्गव्याख्या-तृशास्त्राण्यपि प्रथितानि सन्ति । समस्तमपि वाङ्मयं मूलतश्चत्वारो वेदास्तस्य षडङ्गानि- न्यायः, मीमांसा, धर्मशास्त्रञ्चेति चतुर्दशधा विभक्तमस्ति । तेषाञ्च शाखाः प्रशाखाश्च सहस्रधा विभक्ता व्याख्याताश्च सन्ति । मूलतश्चत्वारो वेदाश्चतस्रो मूलसंहिता वा ऋग्यजुःसामाथर्वाख्याः । तत्रापि ऋच एवैकविंशतिः शाखाः, यजुषः शुक्लभागे पञ्चदश, कृष्णभागे षडशीतिरिति एकोत्तरशतं शाखाः । सहस्त्रवर्त्मा सामवेदः, अथर्वश्च नवविध इति । एतासां शाखानां प्रत्येकब्राह्मणग्रन्था, आरण्यकानि, उपनिषदश्चेति को नाम ताः परिगणयितुं प्रभवति । मूलसंहितानां प्रत्येकं पुनरुपवेदाः क्रमेण आयुर्धनुर्गान्धिवार्थाख्याः । तत्रापि सर्वेषामेव प्रत्येकं शिक्षा, कल्पः, व्याकरणं, निरुक्तं, छन्दो, ज्योतिषमिति षडङ्गानि । एषामपि सन्त्यनेकान्युपाङ्गानि असङ्ख्येयानि शास्त्राणि च प्रत्येकं

कतिपयस्वविभागेषु विभक्तानि भवन्ति, यथा ज्योतिषं हि शास्त्रं सिद्धान्तसंहिताहोराख्येषु त्रिषु स्कन्धेषु विभक्तमस्ति । व्युत्पत्तिदृष्ट्या तु सिद्धान्तफलितोभयविधं ज्यौतिषम् अभिन्नमेकात्मकमेव स्वीक्रियते, यद्यपि फलितज्यौतिषस्य भविष्यवाणीनां व्यवहारत्वात् कश्चन बुद्धिजीविवर्गोऽनेन सहासहमतिं प्रदर्शयन्नवलोक्यते । विदुषां कथनमस्ति यदस्य शास्त्रस्य प्रादुर्भावः कदाऽभूत्, एतत् सम्प्रत्यप्यनिश्चितमस्ति । परन्त्वस्य विकासः, अस्य शास्त्रीयनियमेषु संशोधनं परिवर्द्धनञ्च प्राचीनकालादद्यावधि सततं जातमस्ति ।

आशा, भयञ्च मानवमनसि सततं तिष्ठति, जिज्ञासा च साधारणमानवस्य समानाकाङ्क्षा दुर्बलता वा अस्ति । तां जिज्ञासां समाधातुं स निरन्तरं प्रयतते । फलितज्यौतिषञ्चात्र सहायकमत इदं सामान्यजनानां लोकप्रियशास्त्रमस्ति । परन्तु उपयुक्तदृष्ट्या यदि विचार्यते तर्हीदं केवलं महज्ज्यौतिषस्यैकं लघ्वङ्गं लघुरूपं वाऽस्ति ।

भारतीयानां मते जीवनमतीतस्य, अन्तहीनभविष्यस्य च संयोगरूपं केवलमेकं संयोगचिह्नमस्ति । जीवात्मा स्वीयकर्मणां शक्त्या प्रवर्तितो विभिन्नदेशकालेषु अस्तित्वमापदण्डे आरोहावरोहं प्राप्यासंख्याकारेषु परिवर्तते-खनिजरूपे, पशुरूपे, अन्ते च मनुष्यरूपे । अस्माकं शास्त्रेषु गर्भस्थः शिशुः स्वभूतकालिकज्ञानमवधारतीति स्वीक्रियते, परं यदा बालक: अस्मिन् बाह्यजगति पदार्पणं करोति, तस्य स्मृतिः क्षीयते, आधुनिकपरिभाषया वाऽवचेतनेऽन्तर्हिता जायते । सामान्यदृष्ट्या फलितज्यौतिषं केवलं मानवस्य भविष्यप्रकटनेनैव सम्बद्धमस्ति, परन्तु नाडीग्रन्थेषु भूत-वर्तमान-भविष्यत्कालेष्वेका निरन्तरता प्रदर्शिताऽस्ति । याऽविचलरूपेण घटनाभिः, पूर्वजन्मनि कृतैः कर्मभिश्च व्यक्तेर्वर्तमानावस्थां भाविस्थितिञ्च निरीक्ष्यते । उक्तं वराहेण-

**होरेत्यहोरात्रविकल्पमेके वाञ्छन्ति पूर्वापरवर्णलोपात्।**

**कर्मार्जितं पूर्वभवे सदादि यत्तस्य पङ्क्तिं समभिव्यनक्ति ।।**[1]

अस्मिन् जीवने कर्मानुसारं भाविजन्मरूपाणां निश्चयो ज्यौतिषधर्मशास्त्रीयोभयविधग्रन्थानां विचारणीयविषयेष्वेकतमो वर्तते, यत्रायं विषयः कर्मविपा-करूपेणाभिधीयते ।

इत्थं वयमवलोकयामो यज्ज्यौतिषमध्यात्मशास्त्रेण (Metaphysies) सह सम्बन्धितमस्ति । परब्रह्मणो दर्शनस्यैवैकं रूपं वर्तते । अस्यैका दार्शनिकपृष्ठभूमिर्लक्ष्यं च वर्तते । ज्यौतिषमिदं समस्तकर्मणि समस्तक्रियामाणानि (Creation) चालिङ्गति । यथा मानवस्याध्यात्मिकोन्नत्यै अनुशासितं मनः, अनुशासितं मस्तिष्कम्, अनुशासितश्चात्माऽनिवार्यो भवति, तथैव दैवज्ञोऽपि तादृशमेवानुशासितं मनः, अनुशासितं मस्तिष्कम्, अनुशासितमात्मानञ्च धारयेत्, तदैव तस्य कथितं सत्यं भवितुमर्हति । वृथा प्रश्नानां शीघ्रोत्तरं न वास्तविकः प्रश्नमार्गः, यथा प्रगल्भमन्तव्यानि(Flippaut rem arks) दर्शनं भवितुं नार्हन्ति ।इत्थं हि प्रवृत्तिनिवृत्तिमार्गनिर्देशनपरं हि वाङ्मयमिदं कलेवरेण गुणेन च सर्वाण्यतिशेते इति न प्रमादिकम् ।

**ज्योतिषशास्त्रविषयग्रहणे हेतुः**

वेदस्य षट्स्वङ्गेषु ज्योतिषशास्त्रमन्यतममिति । ज्योतिषशास्त्रं वेदस्य नेत्रत्वेन स्मर्यते । यथोक्तं भास्करेण –

---

[1] बृहज्जातकम्, राशिप्रभेदाध्यायः, श्लो.-३

**शब्दशास्त्रं मुखं ज्यौतिषं चक्षुषी श्रोत्रमुक्तं निरुक्तञ्च कल्पः करौ ।**

**या तु शिक्षास्य वेदस्य सा नासिका पादपद्मद्वयं छन्द आद्यैर्बुधैः ।।**[2]

यथा व्याकरणं वेदपुरुषस्य मुखम्, ज्योतिषशास्त्रन्नेत्रम्, शिक्षाघ्राणम्, निरुक्तं कर्णः, कल्पः हस्तद्वयम्, छन्दशास्त्रं पादद्वयञ्चास्ति । परञ्चेषु षडङ्गेषु ज्योतिषशास्त्रं मूर्धन्यत्वेन प्रतिष्ठितं वर्तते । यथाह –

**यथा शिखामयूराणां नागानां मणयो यथा।**

**तद्वद् वेदाङ्गशास्त्राणां गणितं मूर्धनि स्थितम् ।।**[3]

अपरिमितगगनमण्डले यानि हि तेजोमयानि बिम्बानि दृश्यन्ते तानि सर्वाण्यपि समष्ट्या ज्योतिषशब्देन व्यवह्रियते । तेष्वपि यानि हि सदैकरूपगामीति तानि नक्षत्राणि ये प्रत्यहं भिन्नगतिवन्तः ते ग्रहशब्देन ज्ञायते । तेष्वपि केचन् अमृतमयकिरणाः, केचित् विषमयकिरणाः, केचित् मिश्रितकिरणाः, केचित् निस्तेजकिरणाः स्मृताः जाताः । एषां सर्वेषां ग्रहनक्षत्रतारकादिज्योतिष्पिण्डानां स्थितिगतिप्रभावादिवर्णनपरं शास्त्रमेव ज्योतिषशास्त्रम् ।

सृष्ट्यादिकालतः प्रारभ्याद्यतनं यावत् ज्योतिषशास्त्रस्य सहाय्येन आकाशीयघटनानां ज्ञानम्, पृथ्व्युपरिग्रहनक्षत्रपिण्डानां प्रभावज्ञानम्, पर्यावरणज्ञानम्, पृथिव्याः अन्तःपुटे दुर्घटितघटनानां ज्ञानम्, वेदविहितकार्याणां कृते शुभाशुभकालज्ञानं भवन्तीति ।

---

[2] सि.शि., ग.का. श्लो.-१०

[3] वेदाङ्गज्योतिषम्, श्लोकः-३

उपर्युक्तैर्गुणैरलङ्कृतशास्त्रस्यास्याध्ययनस्याभिलाषा बाल्यकालादेव मम मनसि प्रचलति स्म । जीवनकाले सर्वप्रथममुपशास्त्रीयकक्षायामस्य शास्त्रविशेषस्याध्ययनावसरो प्राप्तः । ततरारभ्याचार्यपर्यन्तं ज्योतिषविषयमधि-कृत्याध्ययनं कृतम् । शोधकक्षायां प्रवेशकाले मया विचिन्तितं यत्- शास्त्रमिदं त्रिषु स्कन्धेषु विभक्तं वर्तते- सिद्धान्त-संहिता-होराश्चेति । त्रयो होरा स्कन्धा मानवजीवने उपयोगीभूताः सन्ति । परञ्च होरास्कन्धयोराधारभूतस्कन्धः वर्तते फलितज्योतिषशास्त्रे । होराशास्त्रेऽस्मिन्नपि बहवः ग्रन्थाः, बहवः विषयाश्च सन्ति । तेषां सर्वेषां ज्योतिषशास्त्रीयविषयाणां क्रमबद्धरीत्याऽध्ययनमशक्यं बृहच्च वर्तते इति मत्वा तथा च शोधविषयनिर्धारणसमये शोधनियमानुसारं केचन निशेषनियमाः विचारणीयाः भवन्ति । यथा- शोधप्रयोजनं दृष्ट्वा शोधस्य या प्रक्रिया, यानि अङ्गानि, येऽपि नियमाः तानि सर्वाणि पूर्वनिर्धारितानि भवन्ति । तेषु नियमेषु मुख्यभागाः भवन्ति सामाजिकशोधाः, क्रियात्मकशोधाः, प्रयोगात्मकशोधाः, विश्लेषणात्मकशोधाः, तुलनात्मकशोधाः, समीक्षणात्मकशोधाः इत्यादयः अनेकेषां विषयाणामुपरि शोधविषयस्य मुख्यतया बलं भवति । स्वशोधस्याधुनिकवैज्ञानिकदृष्टिकोणेन सह कीदृशः सम्बन्धः विषयेस्मिन्नपि विशेषतया विचारः कर्त्तव्यो भवति । अनन्तरं ज्योतिषशास्त्र-प्रयोजनं, ज्योतिषशास्त्रस्य समाजोपरि प्रभावः, आधुनिकयुगे ज्योतिषशास्त्रस्यावश्यकता तेषां विषयाणामुपरि विचारेण चर्चया परिचर्चया वा गुरूणां मार्गदर्शनं लब्ध्वा होरास्कन्धे नवांशफलविषयो सर्वविधशोधकार्ये उपयुक्तो वर्तते अतः मया नवांशविषयमवलम्ब्य शोधकार्ये विषय: चितः, शोधकार्ये च प्रवृत्तोऽहमिति ।

शोधविषयनिर्धारणसमये शोधनियमानुसारं केचन निशेषनियमाः विचारणीयाः भवन्ति । यथा- शोधप्रयोजनं दृष्ट्वा शोधस्य या प्रक्रिया, यानि

अङ्गानि, येऽपि नियमाः तानि सर्वाणि पूर्वनिर्धारितानि भवन्ति । तेषु नियमेषु मुख्यभागाः भवन्ति सामाजिकशोधाः, क्रियात्मकशोधाः, प्रयोगात्मकशोधाः, विश्लेषणात्मकशोधाः, तुलनात्मकशोधाः, समीक्षणात्मकशोधाः इत्यादयः अनेकेषां विषयाणामुपरि शोधविषयस्य मुख्यतया बलं भवति । स्वशोधस्याधुनिकवैज्ञानिकदृष्टिकोणेन सह कीदृशः सम्बन्धः विषयेस्मिन्नपि विशेषतया विचारः कर्त्तव्यो भवति । अनन्तरं ज्योतिषशास्त्र-प्रयोजनं, ज्योतिषशास्त्रस्य समाजोपरि प्रभावः, आधुनिकयुगे ज्योतिषशास्त्रस्यावश्यकता तेषां विषयाणामुपरि विचारेण चर्चया परिचर्चया वा ।

---------------------------